## प्रसंभ्यां जानुनोर्ज्ञुः । (१२९/८६८)

प्र सम् इत्येताभ्यामुत्तरस्य जानुशब्दस्य [1]ज्ञुरादेशो भवति समासान्तो बहुव्रीहौ[2] । [3]प्रकृष्टे जानुनी अस्य प्रज्ञुः । सञ्ज्ञुः ॥

## ऊर्ध्वाद् विभाषा । (१३०/८६९)

[4]ऊर्ध्वशब्दादुत्तरस्य जानुशब्दस्य विभाषा ज्ञुः इत्ययमादेशो भवति[5] । ऊर्ध्वे जानुनी अस्य ऊर्ध्वजानुः, ऊर्ध्वज्ञुः ॥

## ऊधसोऽनङ् । (१३१/४८३)

ऊधस्शब्दान्तस्य बहुव्रीहेः अनङ आदेशो भवति समासान्तः । [6]कुण्डमिव ऊधः अस्याः सा कुण्डोध्नी । [7]घटोध्नी ।

[६४८] ऊधसोऽनङि स्त्रीग्रहणं कर्तव्यम् । (म. भा. २.४४३)

इह मा भूत्, महोधाः पर्जन्यः[8] । घटोधो धेनुकम्[9] ॥

## धनुषश्च । (१३२/८७०)

धनुःशब्दान्तस्य बहुव्रीहेः अनङादेशो भवति समासान्तः । शार्ङ्गं धनुरस्य शार्ङ्गधन्वा । [10]गाण्डीवधन्वा । [11]पुष्पधन्वा । [12]अधिज्यधन्वा[13] ॥

## वा सञ्ज्ञायाम् । (१३३/८७१)

[14]धनुःशब्दान्ताद् बहुव्रीहेरनङादेशो वा भवति[15] सञ्ज्ञायां विषये । पूर्वेण [16]नित्यः प्राप्तः विकल्प्यते । [17]शतधनुः, शतधन्वा । दृढधनुः, दृढधन्वा ॥

## जायाया निङ् । (१३४/८७२)

जायाशब्दान्तस्य बहुव्रीहेर्निङादेशः भवति[18] । युवतिः जाया यस्य युवजानिः । वृद्धजानिः[19] ॥

---

1, जुः प्रत्ययः फ, जुः इत्ययमादेशः ह. 2. समासे इत्यधिकम् ग. फ. ह. 3. प्रगते ग. ड. 4. ऊर्ध्वात् परस्य फ. ह. 5. समासान्तः बहुव्रीहौ समासे इत्यधिकम् क. ड. 6. कुण्डवत् ड. 7. घटोध्नी नास्ति फ. 8. कुण्डोधाः रेतोधाः इत्यधिकम् क. 9. इति इत्यधिकम् ग. फ. 10. गाण्डीव -- अधिज्यधन्वा नास्ति ह. 11. पिनाकधन्वा ड. 12. अधिधन्वा ड, नास्ति फ. 13. बहुव्रीहौ इति किम् ? परमधनुः इत्यधिकम् ग. ड. 14. धनुःशब्दान्तस्य क. ड. 15. समासान्तः इत्यधिकम् क. ड. फ. 16. नित्यं प्राप्ते विकल्पार्थं वचनम् क. 17. शतधनुः नास्ति क. 18. समासान्तः इत्यधिकम् ब. क. फ. 19. वधूजानिः प्रियजानिः रेवतीजानिः इत्यधिकम् ब. ड.